Department : Sanskrit (9)
Semester : II (Hons)
Paper : SANS-H-CC-T-4 (SECTION-A)
Teacher : Sri Bimal Purohit

# वाच्यम्

वाच्यशब्दस्यार्थः अभिधेयः शक्य इति यावत्। यस्य पदस्य यत्र विषये शक्तिः अभिधा वा वर्तते स एव अर्थः वाच्य इति उच्यते। वाच्यशब्दस्य अर्थोऽतः पदात् पदवृत्तिप्रतिपाद्यः ज्ञातः अर्थः। वृत्तिश्च पदपदार्थयोः शाब्दबोधानुकूलः सम्बन्धः। परन्तु, अर्थानां बहुत्वेऽपि वाक्ये प्रत्ययानुसारी वाच्यस्तावत् ~~त्रिधा~~ चतुर्धा विभज्यते त्रिः- प्रत्ययप्रतिपाद्यत्वात् समापिकाक्रियायाः धर्मत्वात्। ते हि कर्ता, कर्म, भावः कर्मकर्ता चेति। अत एव यस्मिन् प्रत्यये उच्चारिते वाक्ये पदस्थो योऽर्थः कर्त्राद्यन्यतमः प्रतीयते, स एवार्थः वाच्य इत्युच्यते तत्तत्प्रत्ययप्रतिपाद्यः। कर्त्रादिसंज्ञा हि विभक्त्यर्थप्रकरणे प्रतिपादिता पाठिता च पूर्वमेव। अत एव तत्तत्संज्ञाप्रतिपाद्यः विषयः एव कर्ता कर्म इति ज्ञेयम्। भावशब्दस्यार्थः

क्रिया धात्वर्थः। ~~कर्तृकर्मण्य~~ कर्मकर्त्री च कर्मणि आरोपितकर्तृत्ववान्।

अथ वाक्ये एतेषु वाच्येषु प्रत्ययैः तद्वाचक ~~पदे~~ – प्रातिपदिकोत्तरं स्वादि विभक्तिः विधीयते। उक्तम् वा अभिहितम्। अनुक्तं नाम अनभिहितम्। तथा च एकत्र वाक्ये एकेन प्रत्ययेन कर्त्राद्यन्यतमे शक्त्या प्रतिपादिते स कर्त्राद्यन्यतमः अभिहित उक्त इति वा उच्यते। एवम् कर्त्राद्यन्यतमे अभिहिते तद्वाचक ~~प्रत्ययेभ्यः~~ – प्रातिपदिकेभ्यः प्रत्ययाः स्वादयः केचन विधीयन्ते अनभिहिते च केचन। तत्र सर्वत्र कर्तरि कर्मणि, कर्मकर्तरि च प्रत्ययपादितार्थे वाच्ये तत्तद्वाचकप्रातिपदिकेभ्यः प्रथमा विधीयते। प्रथमाविभक्तिः पाणिनीयाः। तत्र कर्मणः, च स्वौजसः कर्तुरेकत्वे एकवचनम्, द्वित्वे द्विवचनम्, बहुत्वे च बहुवचनम्। अनभिहितेषु चैतेषु भवन्ति यथाक्रमं कर्तरि तृतीया, कर्मणि द्वितीया भवति। भाववाच्ये च

धात्वर्थस्य क्रियाया एव वाच्यत्वात् प्रत्ययेन कर्तरि अनभिहिते तृतीयैव। अत्रेदमवधेयं यत् भाववाच्यवाचकघटिते वाक्ये कर्मवाचकशब्दः न तिष्ठति। अत एव अकर्मकधातोः भावे एव कस्यचित् वाक्यस्य भाववाच्ये प्रत्ययः क्रियते। इयानी प्रत्येक-प्रत्येकं वाक्यस्य वाच्यप्रतिपादकस्य प्रयोगः अधस्तात्प्रस्तूयते। अत्र एकमेव वाक्यमाधारीकृत्य उदाहरणप्रदर्शनात् प्राक् अपरमेकं तथ्यं निवेद्यते यत् कर्तृवाच्यं विहाय कर्मकर्मकर्तृभाववाच्येषु क्रियापदं तिङन्तं भवति चेत् तत्र सर्वदैव आत्मनेपदमेव भवति। कर्मणि कर्मकर्तरि च वाच्ये तत्तदनुसारिणी विभक्तिः भवति। भाववाच्ये च सर्वदा आत्मनेपदस्य प्रथमपुरुषैकवचनस्य प्रयोगः भवति।

Scanned with CamScanner

(4)

एकम् उदाहरणवाक्यमादाय योग्यानि सर्वाणि संख्यानि प्रदर्श्यन्ते।

1) रामः विद्यालयं गच्छति।

इदं वाक्यं कर्तरि वाच्ये अस्ति अत्र गम्धातोरुत्तरं तिप्प्रत्ययेन कर्तुः अभिहितत्वात्। अतः कर्तृवाचकात् रामप्रातिपदिकात् प्रथमा विधीयते। कर्मणश्च अनभिहितत्वात् ततः यथोक्तं द्वितीया।

2) रामेण विद्यालयः गम्यते।

इदं कर्मणि वाच्ये वर्तते। अत्र गम्धातोरुत्तरं आत्मनेपदप्रत्ययेन कर्म प्रतिपाद्यते। अत एव अभिहिते कर्मणि ~~अर्थे~~ अर्थे प्रथमा कर्मवाचक-विद्यालयप्रातिपदिकात् विहिता। कर्ता च अनभिहित इति तद्वाचक-पदात् तृतीया।

3) रामेण गम्यते।

इदं भाववाच्यस्य उदाहरणम्। अत्र वाक्ये कर्म नास्ति। कर्ता च वर्तते। अत एव ~~कर्तुः~~ कर्तुरनभिधानात् तद्वाचक-पदात् तृतीया, गम्धातोश्च आत्मनेपदं भावार्थे एव।

(5)

4) कर्मकर्तृवाच्यस्य उदाहरणं तावत्
" ओदनः स्वयमेव पच्यते।" इति। अत्र
~~कथ्य~~ कार्ये ओदनस्य वास्तविकतया
कर्मत्वे अपि धात्वर्थनिर्वाहे स्वातन्त्र्य-
विवक्षा तस्यानायासेन उपकारकत्वात्।
अतएव परन्तु, ओदनस्य कर्तृत्वे अपि
क्रियायां कर्मप्रत्यय एव भवति कर्मवद्भावात्।
अतएव पच्यते इत्यत्र आत्मनेपदं
यक् प्रत्ययश्च।